# shrIbalarAmasvAmIprapattiH

# શ્રીબલરામસ્વામીપ્રપત્તિઃ

## Document Information

Text title : balarAmasvAmIprapattiH

File name : balarAmasvAmIprapattiH.itx

Category : deities_misc, rAmAnujasampradAya, prapatti

Location : doc_deities_misc

Proofread by : PSA Easwaran psawaswaran at gmail.com

Acknowledge-Permission: Shri Tripursundari Ved Gurukulam, Sahibabad (Ghaziabad), UP

Latest update : March 24, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીબલરામસ્વામીપ્રપત્તિઃ

રીવારાજ્યસમીપગ્રામપટના વિન્ધ્યાચલે સન્નિભમ્,
કૌશિક્યે શુચિગોત્રવૈષ્ણવકુલે શ્રીમિશ્રવંશોદ્ભવમ્ ॥

શબ્દાદીન્ વિષયાન્ પ્રદર્શ્ય વિભવં વિસ્માર્યદાસાત્મકમ્ ।
શ્રીબલરામો વિહાય ભૌતિકસુખં ત્યક્ત્વા બહિર્નિર્ગતઃ ॥ ૧॥

શ્રીકામદગિરિચિત્રકૂટવિપિને શ્રીરામદેશિકગુરું
શઙ્ખચક્રભુજૌ ગ્રહીતિ પરમં શરણાગતિં શ્રીહરિમ્ ।
ક્ષન્તવ્યં મમ માનસઞ્ચ ચપલં સંસેવ્ય યુષ્માનપિ,
ભક્તિપ્રાપ્તગુરું પ્રસન્નવદનં બલરામદેશિકમુનિમ્ ॥ ૨॥

શ્રીભાષ્યાદિ પ્રબન્ધપાઠપઠને આચાર્ય પદવીં પદે,
શ્રીપરકાલ અહોવિલાદિવચને વિશ્વાસપ્રેમાસ્પદમ્ ।
વેદાન્તદેશિકનિત્યપાદકમલે શ્રીરામદેશિકપદે,
મોક્ષમયાચત શ્રીનિવાસયજને શ્રીબલરામદેશિકગુરુમ્ ॥ ૩॥

હરિસદનં ભ્રમણં કરોતિ સકલં બદરીવને ચાગતઃ ।
લબ્ધ્વા જ્ઞાનવિરાગભક્તિમતુલાં સાન્નિધ્યધાનુર્ધને ।
દ્વાદશવર્ષગતો વિચિન્ય મનસા શ્રીચિત્રકૂટાગતઃ
શ્રીરામદેશિકપદપ્રાપ્તહર્ષિતતનુઃ શ્રીબલરામદેશિકગુરુમ્ ॥ ૪॥

પુરાણલઙ્કા ચ મનોહરાણિ દદર્શ સ્વામિન્ ગુરુપાદસેવી ।
સત્પાત્રસમ્પ્રાપ્તમઠાધિકારં પ્રદત્તવાન્ દેશિકરામપૂર્વમ્ ।
ગુરુપ્રભાવાચ્ચ તપોબલેન મઠસ્ય વૃદ્ધિં પ્રકરોતિ નિત્યમ્ ॥ ૫॥

શ્રીરામદેશિકપદે વિન્યસ્તભારં શ્રીવેઙ્કટેશપદપઙ્કજ નિત્યસેવામ્ ।
વેદાન્તદેશિકે વિરાગે નિધાય કાયં બલરામદેશિકસમાનસમર્થકોઽપિ ॥ ૬॥

કલેવરં કાલબલેન હિત્વા માર્ગેણ ગતો વિકુણ્ઠે ।
મનઃ સમાધાય શ્રીરઙ્ગપાદે પ્રપન્નબલરામસુસૂક્ષ્મદેહે ॥ ૭॥

પુરુષાર્થો બલરામસ્ય બલરામમિવાપરઃ ।
શ્રીનિવાસપદે નિષ્ઠા દૃઢા પ્રીતિઃ સમર્ચને ॥ ૮॥

આચાર્યબલરામસ્ય ચરિતં પરમાદ્ભુતમ્ ।
ભાગવતાચાર્યદાસેન સ્વબુદ્ધ્યા સઙ્ગ્રહીકૃતમ્ ॥ ૯॥

ઇતિ શ્રીબલરામસ્વામી પ્રપત્તિઃ ॥

Proofread by PSA Easwaran

*shrIbalarAmasvAmIprapattiH*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*